अथ हल्सन्धिः

६२. स्तोः श्चुना श्चुः ८/४/४०

सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः। रामश्शेते। रामश्चिनोति। सच्चित्। शार्ङ्गिञ्जयः।

६३. शात् ८/४/४४

शात् परस्य तवर्गस्य चुत्वं न स्यात्। विश्नः। प्रश्नः।

६४. ष्टुना ष्टुः ८/४/४१

स्तोः ष्टुना ष्टुः स्यात्। रामष्षष्ठः। रामष्टीकते। पेष्टा। तट्टीका। चक्रिण्ढौकसे।

---

६२. स् च तुश्च स्तुः, तस्य स्तोः। श् च चुश्च श्चुः, तेन श्चुना। श्चुः। अर्थात् सकारतवर्गयोः शकारेण चवर्गेण च योगे सति सस्य स्थाने शकारः, तवर्गस्य च यथासङ्ख्यं चवर्गः भवति।

उदाहरणस्य विश्लेषणम् –

रामस् + शेते इत्यत्र सस्य शकारेण योगः अस्ति, अतः सस्य स्थाने 'श' आदेशः जातः। अतः रामश्शेते इति रूपम्। एवमेव रामस् + चिनोति अत्र सस्य चवर्गयोगः। सत् + चित् इत्यत्र तवर्गस्य चवर्गयोगः। शार्ङ्गिन् + जय इत्यत्रापि चवर्गयोगः। अतः सस्य शकारः, तवर्गस्य च चवर्गादेशः भवति।

रूपलेखनप्रकारः –

रामस् + शेते इत्यत्र "स्तोः श्चुना श्चुः" इति सूत्रेण शकारयोगे सस्य शकारादेशे कृते रामश्शेते इति सिद्धम्।

अन्यानि उदाहरणानि –

हरिस् शेते = हरिश्शेते। कस् + चित् = कश्चित्। सत् + चरित्रम् = सच्चरित्रम्। विपत् + जालम् = विपज्जालम् इत्यादीनि।

६३. चुत्वस्य प्रतिषेधकं सूत्रम् एतत्। शकारात् परस्य तवर्गस्य शकारयोगे सत्यपि चुत्वं न भवति इत्याशयः।

उदाहरणस्य विश्लेषणम् –

विश् + नः, प्रश् + नः इत्यत्र नकारः तवर्गस्य वर्णः। स च शकारात् परः विद्यते। अत्र तवर्गस्य शकारेण योगः अस्ति, अतः 'स्तोः श्चुना श्चुः' इति सूत्रेण चुत्वं प्राप्तं भवति। 'शात्' इति सूत्रेण चुत्वस्य निषेधः क्रियते, अतः विश्नः, प्रश्नः इत्येव रूपे भवतः।

रूपलेखनप्रकारः –

विश् + नः, इत्यत्र "स्तोः श्चुना श्चुः" इति सूत्रेण शकारयोगे नस्य चुत्वेन ञकारे प्राप्ते "शात्" इति सूत्रेण निषेधे कृते विश्नः इति रूपं सिद्धम्।

६४. ष् च टुश्च ष्टुः। सकारतवर्गयोः षकारेण टवर्गेण च योगे सति सस्य षः, तवर्गस्य च स्थाने टवर्गः प्रयुज्यते इति भावः।

उदाहरणस्य विश्लेषणम् –

रामस् + षष्ठः इत्यत्र सस्य षकारेण योगः (सम्बन्धः) अस्ति, अतः सस्य 'ष' आदेशः भवति। एवमेव रामस् + टीकते इत्यत्र सस्य टकारेण योगः, पेष् + ता इत्यत्र तवर्गस्य षकारेण योगः, तत् + टीका इत्यत्र तवर्गस्य टवर्गीयेण योगः, चक्रिन् + ढौकसे इत्यत्रापि तथैव। अतः सर्वत्र तवर्गस्य टवर्गरूपे सस्य च षकाररूपे परिवर्तनं जातम्।

६५. न पदान्ताट्टोरनाम् ८/४/४२

पदान्ताट्टवर्गात् परस्याऽनामः स्तोः ष्टुर्न स्यात्। षट् सन्तः। षट् ते पदान्तात् किम् ? ईट्टे। टोः किम् ? सर्पिष्टमम्। (अनाम्नवतिनगरीणामिति वाच्यम्) षण्णाम्। षण्णवतिः। षण्णगर्यः।

६६. तोःषि ८/४/४३

न ष्टुत्वम्। सन्षष्ठः।

रूपलेखनप्रकारः -

रामस् + षष्ठः इत्यत्र ''ष्टुना ष्टुः इति सूत्रेण षकारयोगे सस्य षकारादेशे कृते ''रामष्षष्ठः'' इति रूपं सिद्धम्।

अन्यानि उदाहरणानि -

त्रयस् + षट्पदाः = त्रयषट्पदाः। मत् + टीका = मट्टीका। पदार्थास् + टङ्किताः = पदार्थाष्टङ्किताः।

६५. **न पदान्तात् टोः अनाम्** इतिच्छेदः। पदान्तात् टवर्गात् परस्य सस्य तवर्गस्य च ष्टुत्वं न भवति, किन्तु 'नाम्' इत्यस्य तु नस्य टवर्गणकारः भवति। **वार्तिकम्** - नाम्भिन्नस्य, नवतिभिन्नस्य, नगरीभिन्नस्य च ष्टुत्वं न भवति इति वक्तव्यम् अर्थात् पदान्तात् टवर्गात् परस्य नाम्, नवति, नगरी इति पदत्रयस्य तवर्गनकारस्य तु ष्टुत्वं भवति, अन्यस्य ष्टुत्व निषेधः इति वार्तिकाशयः।

उदाहरणस्य विश्लेषणम् -

षट् + सन्तः इत्यत्र पदान्तात् टवर्गात् परस्य सस्य 'ष्टुना ष्टुः' इति प्राप्तस्य षादेशस्य अनेन निषेध : क्रियते। षट् + ते इत्यत्र तवर्गस्य प्राप्तः टवर्गादेशः अनेन निषिध्यते, पदान्तटवर्गात् परत्वात्। षड्नाम्, षड्नवतिः, षड्नगर्यः इत्यत्र तु वार्तिकानुसारं नस्य टवर्गणकारः विधीयते डस्य अनुनासिके च षण्णाम्, षण्णवतिः, षण्णगर्यः इति रूपाणि भवन्ति।

रूपलेखनप्रकारः -

षट् सन्तः षड् + सन्तः इत्यत्र ''ष्टुना ष्टुः'' इति सूत्रेण सस्य षत्वे प्राप्ते'' न पदान्ताट्टोरनाम्'' इति सूत्रेण निषेधे कृते ''खरि च'' इति सूत्रेण डस्य चर्त्वेन टकारे कृते 'षट्सन्तः'' इति रूपं सिद्धम्। एवमेव षट्ते इत्यत्र टुत्वनिषेधः।

षण्णाम् -

षड् + नाम् इत्यत्र ''न पदान्तात्.'' इति ष्टुत्वस्य निषेधे प्राप्ते ''अनाम्नवति'' इत्यादिवार्तिकेन प्रतिषेधे ष्टुत्वे च कृते षड्+णाम् इत्यवस्थायां ''प्रत्यये भाषायां नित्यम्'' इति वार्तिकेन डकारस्य अनुनासिके च कृते 'षण्णाम्' इति रूपम्। ईट्टे इत्यत्र ईड् + ते इत्यवस्थायां टवर्गस्य (डकारस्य) पदान्तत्वाभावात् न ष्टुत्वस्य निषेधः, अतः ष्टुत्वे ईड् + टे इति जाते डस्य चर्त्वेन (खरि च) टकारे ईट्टे इति रूपम्। सर्पिष् + तमम् इत्यत्र तु ष्टुत्वं भवति। सूत्रे यदि पदान्तात् ष्टोः इति अकथयिष्यत् तदा तु ष्टुत्वस्य निषेधः अभविष्यत्।

अन्यानि उदाहरणनि -

षट् + तरवः = षट् तरवः। द्विड् + धावति = द्विड्धावति इत्यादीनि।

६६. तु इत्यस्य पञ्चम्येकवचनं तोः इति। षि इति ष् इत्यस्य सप्तम्ये - कवचनम्। अतः तवर्गात् षकारे परे तवर्गस्य टवर्गः न भवति इति सूत्रार्थः।

उदाहरणस्य विश्लेषणम् -

सन् + षष्ठः इत्यत्र तवर्गस्य नकारः, तस्मात् परः 'षष्ठः' इति षकारः। अत्र षकारयोगे तवर्गस्य ''ष्टुना ष्टुः'' इति टवर्गे प्राप्ते, अनेन निषिध्यते। अतः सन्षष्ठः इत्येवं रूपम्।

६७. **झलां जशोऽन्ते ८/२/३९**

पदान्ते झलां जश: स्यु:। वागीश:।

६८. **यरोऽनुनासिकेऽनुनासिको वा ८/४/४५**

यर: पदान्तस्यानुनासिके परेऽनुनासिको वा स्यात्। एतन्मुरारि: एतद्मुरारि:।

रूपलेखनप्रकार: -

सन् + षष्ठ: इत्यत्र ''ष्टुना ष्टु:'' इति सूत्रेण षकारयोगे तवर्गनकारस्य टवर्गे (टुत्वे) प्राप्ते ''तो: षि'' इति सूत्रेण तन्निषेधे कृते 'सन्षष्ठ:' इति सिद्धम्।

अन्यानि उदाहरणानि -

मयूरात् षण्मुखोऽवतरति। पुष्पात् षट्पद उत्पतति इत्यादीनि।

६७. **झलाम् जश: अन्ते** इतिच्छेद:। पदान्ते विद्यमानानां झलां स्थाने जश: = वर्गाणां तृतीयवर्णा: जबगडदा: यथायोग्यं स्यु:।

उदाहरणस्य विश्लेषणम् -

वाक् + ईश: इत्यत्र पदान्ते विद्यमान: झल् ककार:, तस्य च स्थाने कवर्गतृतीय: गकार: भवति, अत: वागीश: इति रूपम्। एवमेव जगदीश: इत्याद्यपि ज्ञेयम्।

रूपलेखनप्रकार :-

वाक्+ईश: इत्यत्र ''झलां जशोऽन्ते'' इति सूत्रेण पदान्ते विद्यमानस्य ककारस्य जश्त्वेन गकारे कृते वाग् + ईश: इत्यवस्थायां वर्णसम्मेलने कृते वागीश: इति रूपं सिद्धम्।

अन्यानि उदाहरणानि -

जगत्+ईश: जगदीश:। दिक्+अम्बर: = दिगम्बर:। षट् + आम्रफलानि = षडाम्रफलानि। चित् + आनन्द: = चिदानन्द:। चित् + रूपम् = चिद्रूपम् इत्यादीनि।

६८. **यर: अनुनासिके अनुनासिक: वा** इतिच्छेद:। पदान्ते विद्यमान: य: यर् प्रत्याहारवर्ण:, तस्मात् वर्णात् परे अनुनासिके वर्णे सति तस्य यर्प्रत्याहारवर्णस्य विकल्पेन अनुनासिकवर्ण: भवति इत्याशय:।

उदाहरणस्य विश्लेषणम् -

यथा एतद् + मुरारि: इत्यत्र पदान्ते विद्यमान: यर्प्रत्याहारवर्ण: दकार: अस्ति। तस्मात् पर: मकार: अनुनासिकवर्ण: विद्यते। अत: दकारस्य (यर:) स्थाने विकल्पेन तद्वर्गीय एव अनुनासिक: नकार: जात:। अनुनासिकाभावे दकार एव तिष्ठति। इत्थम् एतन्मुरारि: एतद्मुरारि: इति रूपद्वयम्।

रूपलेखनप्रकार: -

एतद् + मुरारि: इत्यत्र ''यरोऽनुनासिकेऽनुनासिको वा'' इति सूत्रेण दकारस्य विकल्पेन अनुनासिके नकारे कृते एतन्मुरारि: इति रूपं सिद्धम्। अनुनासिकाभावे एतद्मुरारि: इत्यपि द्वितीयं रूपम्। (प्रत्यये भाषायां नित्यम्) तन्मात्रम्। चिन्मयम्।

अन्यानि उदाहरणानि -

त्वग् + मनसी = त्वङ्मनसी, त्वग्मनसी। धिग् + मूर्खम् = धिङ्मूर्खम्, धिग्मूर्खम्। मद् + नीति: = मन्नीति: मद्नीति। जगद् + नाथ: = जगन्नाथ:, जगद्नाथ: इत्यादीनि।

वार्तिकम् -

अनुनासिकादिप्रत्यये परे पदान्तस्य यर: स्थाने नित्यम् अनुनासिकवर्ण: भवति।

६९. **तोर्लि: ८/४/६०**
तवर्गस्य लकारे परे परसवर्ण:। तल्लय:। विद्वाँल्लिखति। नस्यानुनासिको ल:।

७०. **उद: स्थास्तम्भो: पूर्वस्य ८/४/६१**
उद: परयो: स्थास्तम्भो: पूर्वसवर्ण:।।

७१. **तस्मादित्युत्तरस्य १/१/६७**
पञ्चमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाव्यवहितस्य परस्य ज्ञेयम्।

उदाहरणस्य विश्लेषणम् –

तद् + मात्रम् इत्यत्र पदान्तस्य दकारस्य (यर:) मात्रच् प्रत्यये परे सूत्रेण विकल्पेन अनुनासिके प्राप्ते अनेन वार्तिकेन नित्यम् अनुनासिकत्वं विधीयते, अत: तन्मात्रम् इति एकमेव रूपम्। एवमेव चिन्मयम् इत्यत्रापि ज्ञेयम्।

रूपलेखनप्रकार: –

तत् + मात्रम् इत्यत्र ''यरोऽनुनासिकेऽनुनासिको वा'' इति सूत्रेण तस्य विकल्पेन अनुनासिके प्राप्ते ''प्रत्यये भाषायां नित्यम्'' इति वार्तिकेन नित्यम् अनुनासिके कृते तन्मात्रम् इति सिद्धम्।

अन्यानि उदाहरणानि –

वाग् + मय: = वाङ्मय:। वाग् + मात्रम् = वाङ्मात्रम्। षड् + णाम् = षण्णाम् इत्यादीनि।

६९. तो: लि इतिच्छेद:। तवर्गात् लकारे परे तवर्गवर्णस्य परसवर्ण: स्यात्। यथा – तद् + लय: इत्यत्र तवर्गस्य वर्ण: दकार: विद्यते, तस्मात् पर: लय: इति लकार: विद्यमान:। अत: पूर्वस्य दस्य परसवर्ण: लकार: एव भवति। एवमेव विद्वान् + लिखति इत्यत्र तवर्गस्य नकार:, तस्मात्पर: लिखति इति लवर्ण: विद्यते। अत: अनेन सूत्रेण नकारस्य स्थाने परसवर्णत्वेन अनुनासिकलकार: विधीयते। यतो हि पूर्वम् उक्तं यत् यवला: अनुनासिकत्वाननुनासिकत्वाभ्यां द्विधा भवन्ति। अत: अनुनासिकस्य नकारस्य स्थाने क्रियमाण: परसवर्ण: लकार: अपि अनुनासिक: एव भवति 'विद्वाँल्लिखति' इति। 'तल्लय:' इत्यत्र तु दकार:, स च न अनुनासिक:। अत: तस्य स्थाने परसवर्ण: लकार अपि अननुनासिक एव भवतीति विज्ञेयम्।

रूपलेखनप्रकार: –

तद् + लय: इत्यत्र ''तोर्लि'' इति सूत्रेण दस्य परसवर्णत्वेन लकारे कृते 'तल्लय:' इति सिद्धम्।

अन्यानि उदाहरणानि –

तद् + लीन: = तल्लीन:। जगद् + लीयते = जगल्लीयते। भगवद् + लीला = भगवल्लीला। हसन् + लिखति = हसँल्लिखति। धीमान् + लिखति = धीमाँल्लिखति इत्यादीनि।

७०. उद् इति उपसर्ग:, तस्मात् परस्य स्थाधातो:, स्तम्भधातो: च पूर्वसवर्ण: स्यात्। यथा उद् + स्थानम्, उद् + स्तम्भनम् इत्यत्र उदुपसर्गात् परौ स्थास्तम्भौ धातू स्त:। अत: अनयो: धात्वो: पूर्वसवर्ण: भवति।

प्रश्न: –

उद् इति उपसर्गात् परस्य इत्युक्ते: किं व्यवहितपरस्य अपि कार्यं कर्तुं शक्यते वा ? अव्यवहितपरस्य वा ? इति प्रश्ने वक्ष्यते 'तस्मादित्युत्तरस्य' इति परिभाषां सूत्ररूपाम्।

७१. **तस्मात् इति उत्तरस्य** इतिच्छेद:। परिभाषासूत्रम् इदम्। पञ्चमीनिर्देशद्वारा यत् कार्यं विधीयते, तत्कार्यं पञ्चमीनिर्देशेन प्रयोगे बोधितात् अव्यवहितपरस्य = व्यवधानशून्यस्य परस्य बोध्यम् इति व्यवस्था। प्रकृतप्रसंगे ''उद: स्थास्तम्भो:'' इति सूत्रे 'उद:' इत्येवं पञ्चमीनिर्देश:। एतेन प्रयोगे उद् + स्थानम्, उद् + स्तम्भनम् इत्यत्र

७२. **आदेः परस्य १/१/५४**

परस्य यद्विहितं तत्तस्यादेर्बोध्यम्। इति सस्य थः।

७३. **झरो झरि सवर्णे ८/४/६५**

हलः परस्य झरो वा लोपः स्यात् सवर्णे झरि।

७४. **खरि च ८/४/५५**

उद् इत्यस्य ग्रहणं भवति। अतः अस्मात् उदः अव्यवहितपरस्य = साक्षात् उत्तरस्य एतेन क्रियमाणं परसवर्णरूपं कार्यं कर्तव्यम्। उदः अव्यवहितपरम् उक्तधातुद्वयम् अस्ति, अतः तस्यैव तत्।

प्रश्न :

उदः अव्यवहितपरस्य स्थाधातोः, स्तम्भधातोश्च किं सम्पूर्णस्य स्थाने पूर्वसवर्णः कार्यः ? कस्यचिद् अंशविशेषस्य वा ? इति जिज्ञासायाम् अवतारयति व्यवस्थापकं परिभाषासूत्रम् – ''आदेः परस्य'' इति –

७२. परस्य = उत्तरस्य यत् कार्यं विहितं, तत्कार्यं तस्य आदेः वर्णस्य बोध्यम् इति व्यवस्था। अतः उद् + स्थानम् इत्यत्र उदः अव्यवहितपरस्य स्थाधातोः आदिवर्णस्य सकारस्य, उद् + स्तम्भनम् इत्यत्र स्तम्भधातोः आदिवर्णस्य सकारस्य स्थाने पूर्वसवर्णः वर्णः कर्तव्यः। पूर्वः दकारः तस्य सवर्णिनः तवर्गस्य सर्वे वर्णाः 'तथदधनाः' सन्ति। एतेषु सकारस्य स्थाने कतमः विधेयः ? इति प्रश्ने – 'स्थानेऽन्तरतमः' इति निर्देशानुसारं सस्य सदृशतमः विवारश्वासाघोषमहाप्राणः थकारः एव पूर्वसवर्णः भवति, नान्यः।

उदाहरणस्य विश्लेषणम् –

उद् + स्थानम् इत्यत्र ''तस्मादित्युत्तरस्य'' ''आदेः परस्य'' इति सूत्रद्वयसहकारेण ''उदः स्थास्तम्भोः पूर्वस्य'' इति सूत्रेण उदः अव्यवहितस्य परस्य स्थाधातोः आदेः वर्णस्य सकारस्य स्थाने सदृशतमे पूर्वसवर्णत्वेन थकारे कृते उद् + थ् थानम् इति स्थिते, उद् + स्तम्भनम् इत्यत्र च उद् + थ् तम्भनम् इति स्थिते .... ।

७३. हलः परस्य झर्प्रत्याहारगतवर्णस्य विकल्पेन लोपः भवति सवर्णे झरि परे सति इति सूत्राशयः।

उदाहरणस्य विश्लेषणम् –

उद् + थ् थानम्, उद् + थ् तम्भनम् इत्यत्र दकारात् (हलः) परस्य थकारस्य (झरः) लोपः भवति, यतो हि तस्मात् परः तस्य सवर्णः झर् क्रमशः उक्तयोः प्रयोगयोः थकारः, तकारश्च विद्यते। इत्थम् उद्+थानम् इति, उद्+तम्भनम् इति स्थितिः जाता ....।

७४. खरि = खर्प्रत्याहारान्तर्गताः ये वर्णाः तेषु परेषु, झलां स्थाने चरः = 'च ट त क प श ष स' इत्येते स्युः।

उदाहरणस्य विश्लेषणम् –

उद् + थानम्, उद् + तम्भनम् इत्यत्र उभयत्र दकारः झल्वर्णः, तस्मात् परौ क्रमशः थकारतकारौ स्तः, तौ च खर्प्रत्याहारगतौ विद्येते। अतः खर्परत्वात् झलः =दस्य चर्त्वेन तकारः सञ्जातः इत्येवम् उत् + थानम्, उत् + खरि झलां चरः स्युः। इत्युदो दस्य तः। उत्थानम्। उत्तम्भनम्।

७५. झयो होऽन्यतरस्याम् ८/४/६२

झयः परस्य हस्य वा पूर्वसवर्णः। नादस्य घोषस्य संवारस्य महाप्राणस्य तादृशो वर्गचतुर्थः। वाग्घरिः, वाग्हरिः।

७६. शश्छोऽटि ८/४/६३

झयः परस्य शस्य छो वाऽटि। तद्+शिवः इत्यत्र दस्य श्चुत्वेन जकारे कृते 'खरि च' इति जकारस्य चकारः। तच्छिवः, तच्शिवः। (छत्वममीति वाच्यम्) तच्छ्लोकेन।

तम्भनम् इति स्थितिः जाताः, ततश्च वर्णसम्मेलने उत्थानम् इति, उत्तम्भनम् इति रूपं निष्पद्यते।

रूपलेखनप्रकारः -

उद्+स्थानम् इत्यत्र ''तस्मादित्युत्तस्य'' ''आदेः परस्य'' स्थानेऽन्तरतमः'' इति सूत्रत्रयसहकारेण ''उदः स्थास्तम्भोः पूर्वस्य'' इति सूत्रेण सस्य स्थाने पूर्वसवर्णे थकारे कृते उद्+थ् थानम् इति स्थिते'' झरो झरि सवर्णे'' इति सूत्रेण पूर्वस्य थकारस्य विकल्पेन लोपे कृते उद्+थानम् इत्यवस्थायां ''खरि च'' इति सूत्रेण उदः दस्य चर्त्वेन तकारे कृते 'उत्थानम्' इति एकं रूपम्। थलोपाभावपक्षे तु 'उत्थ्थानम्' इति द्विथकारयुक्तं रूपं द्वितीयं सिद्धम्। उद्+स्तम्भनम् इत्यत्रापि तथैव थकारे, थलोपे दस्य तकारे उत्तम्भनम् इति रूपम्। थलोपाभावपक्षे तु उत्थ्तम्भनम् इत्येव रूपम्। थस्य चर्त्वं तु न शङ्क्यम्, चर्त्वं प्रति थकारस्य असिद्धत्वात्।

अन्यद् उदाहरणम् -

उद् + स्थापकः = उत्थापकः, उद् + स्थितिः = उत्थितिः इत्यपि ज्ञेयम्।

७५. झयः हः अन्यतरस्याम् इतिच्छेदः। झय् इति प्रत्याहारः, तत्र झ भ घ ढ ध ज ब ग ड द ख फ छ ठ थ च ट त क प इति वर्णाः। ततः परस्य हकारस्य विकल्पेन पूर्वसवर्णः भवति।

उदाहरणस्य विश्लेषणम् -

वाग् + हरिः इत्यत्र गकारः झय् वर्णः तस्मात् परः हकारः विद्यते, अनेन सूत्रेण हस्य स्थाने पूर्वसवर्णे घकारे कृते वाग्घरिः इतिरूपम्। पूर्वसवर्णाभावे तु वाग्हरिः इत्येवरूपम्। हस्य पूर्वसवर्णत्वेन 'क ख ग ङ' एष्वपि कश्चन कथं न भवति ? केवलः घकार एव कथं जातः ? इति प्रश्ने आह - एषु कवर्गीये घकारः एव हकारेण सदृशतमः बाह्यप्रयत्नसाम्यात्। अतः हकारस्य पूर्वसवर्णः वर्गस्य चतुर्थवर्णः एव भवति, न अन्यः। प्रतिवर्गं चतुर्थः एव नादघोषसंवारमहाप्राणः, हकारः अपि तादृशः एव।

रूपलेखनप्रकारः -

वाक् + हरिः इत्यत्र ''झलां जशोऽन्ते'' इति सूत्रेण ककारस्य जश्त्वे गकारे कृते वाग् + हरिः इत्यवस्थायां ''झयोहोऽन्यतरस्याम्'' इति सूत्रेण हस्य स्थाने विकल्पेन पूर्वसवर्णे घकारे कृते वाग्घरिः इति प्रथमं रूपम्। पूर्वसवर्णाभावे तु 'वाग्हरिः' इत्येव रूपं भवति।

अन्यानि उदाहरणानि -

तद् + हितम् - तद्धितम्। दिग् + हस्ती = दिग्घस्ती। अज् + हलौ = अज्झलौ। स्याद् + हलि = स्याद्धलि। रत्नमुड् + हरति = रत्नमुड्ढरति इत्यादीनि।

७६. शः छः अटि इतिच्छेदः। अट् इति प्रत्याहारः। झयः परस्य शकारस्य स्थाने वा छकारः भवति, यदि तस्मात् परः अट्वर्णः स्यात्।

उदाहरणस्य विश्लेषणम् -

तद् + शिवः इत्यत्र शकारयोगे दस्य श्चुत्वेन जकारे तज् + शिवः ''खरि च'' इत्यनेन जस्य चर्त्वेन चकारे तच् + शिवः इत्यवस्थायाम् अनेन सूत्रेण शस्य विकल्पेन छत्वं, विधीयते इकाररूपस्य अटः परतः

७७. **मोऽनुस्वारः ८/३/२३**
मान्तस्य पदस्यानुस्वारो हलि। हरिं वन्दे।

७८. **नश्चापदान्तस्य झलि ८/३/२५**
नस्य मस्य चापदान्तस्य झल्यनुस्वारः । यशांसि । आक्रंस्यते। झलि किम् ? मन्यते।

सत्त्वात्। छत्वाभावे शकार एव, अतः उक्तरूपद्वयं भवति।

रूपलेखनप्रकारः -

तद् + शिवः इत्यत्र ''स्तोः श्चुना श्चुः'' इति सूत्रेण दस्य श्चुत्वेन जकारे कृते तज् + शिवः इति जाते ''खरि च'' इत्यनेन सूत्रेण जस्य चर्त्वेन चकारे कृते सति तच् + शिवः इत्यवस्थायां ''शश्छोऽटि'' इति सूत्रेण - विकल्पेन शस्य छत्वे कृते तच्छिवः इति रूपम्। छत्वाभावे तु तच्शिवः इति द्वितीयं रूपं सिद्धम्।

वार्तिकम् -

छत्वकरणे अम्प्रत्याहारे परे इति वक्तव्यम् इति भावः। अर्थात् शकारात् परे अमि सति इति। तद्यथा तद् + श्लोकेन इत्यत्र दस्य जकारे, जस्य चर्त्वेन चकारे तच्श्लोकेन इति जाते शस्य छत्वं भवति, यतो हि तस्मात्परः अम्प्रत्याहारवर्णः लकारः विद्यते। अटि इति कथनमात्रे तु छत्वं न स्यात्, लस्य अट्त्वाभावात्।

अन्यानि उदाहरणानि -

वाक् + शूरः = वाक्छूरः, वाक्शूरः।
जगत् + शान्तिः = जगच्छान्तिः, जगच्शान्तिः।
यावत् + शक्यम् = यावच्छक्यम्, यावच्शक्यम्।
भवत् + शिष्यः = भवच्छिष्यः, भवच्शिष्यः।
त्वत् + शङ्का = त्वच्छङ्का; त्वच्शङ्का।
मत् + श्लाघा = मच्छ्लाघा, मच्श्लाघा इत्यादीनि।

७७. **मः अनुस्वारः।** मान्तस्य पदस्य अनुस्वारः भवति हलि = व्यञ्जने वर्णे परे। किं सम्पूर्णपदस्य स्थाने अनुस्वारः कार्यः ? न हि, केवलस्य अन्त्यस्य मकारस्य, 'अलोऽन्त्यस्य' इति परिभाषया।

उदाहरणस्य विश्लेषणम् -

हरिम् + वन्दे इत्यत्र पदान्तस्य मकारस्य अनुस्वारः भवति यतो हि तस्मात्परः हल् वर्णः विद्यते, अतः हरिं वन्दे इति।

रूपलेखनप्रकारः -

हरिम् + वन्दे इत्यत्र ''मोऽनुस्वारः'' इति सूत्रेण मस्य अनुस्वारे हरिं वन्दे इति रूपं सिद्धम्।

अन्यानि उदाहरणानि -

विद्यालयम् + गच्छति = विद्यालयं गच्छति। पुस्तकम् + पठति = पुस्तकं पठति । आचार्यम् + नमति = आचार्यं नमति। प्रभुम् + भजति = प्रभुं भजति इत्यादीनि।

७८. **नः च अपदान्तस्य झलि** इति पदच्छेदः। अपदान्तस्य नकारस्य मकारस्य च झलि परे अनुस्वारः भवति।

७९. **अनुस्वारस्य ययि परसवर्णः। ८/४/५८**
स्पष्टम् । शान्तः।

८०. **वा पदान्तस्य ८/४/५९**
त्वङ्करोषि, त्वं करोषि।

उदाहरणविश्लेषणम् -

यशान् + सि, आक्रम् + स्यते इत्यत्र क्रमशः अपदान्तः नकारः मकारश्च विद्यते, ततः परः सकारः झल्रूपी। अपदान्तः इत्युक्ते पदमध्यस्थः। अतः नकारस्य मकारस्य अनुस्वारः विधीयते अत्र। इत्थं यशांसि, आक्रंस्यते इति सिद्धिः।

रूपलेखनप्रकारः -

यशान् + सि इत्यवस्थायां ''नश्चापदान्तस्य झलि'' इति सूत्रेण अपदान्तस्य नकारस्य झल्परकत्वात् अनुस्वारे कृते यंशासि इति रूपं सिद्धम्। आक्रंस्यते इत्यत्र मस्य अनुस्वारः इति ज्ञेयम्।

अन्यानि उदाहरणानि -

पयान् + सि = पयांसि। सरान् + सि = सरांसि।

सङ्गम् + स्यते = सङ्गंस्यते।, इत्यादीनि।

७९. अनुस्वारस्य स्थाने परसवर्णः भवति ययि = यय्प्रत्याहारे परे। यस्य वर्गस्य परवर्णः, तद्वर्गीयः पञ्चमः वर्णः परसवर्णत्वेन करणीयः।

उदाहरणस्य विश्लेषणम् -

शां + तः इत्यत्र आकारात्परः अनुस्वारः, विद्यते, तस्माच्च परः तवर्गतकारः अस्ति। अनेन सूत्रेण अनुस्वारस्य स्थाने परसवर्णत्वेन तवर्गस्य पञ्चमः नकारः विधीयते, अतः शान्तः इति रूपम्।

रूपलेखनप्रकारः -

शाम् + तः इत्यत्र ''नश्चापदान्तस्य झलि'' इति सूत्रेण अपदान्तस्य मकारस्य स्थाने अनुस्वारे कृते शां + तः इति जाते ''अनुस्वारस्य ययि परसवर्णः'' इति सूत्रेण अनुस्वारस्य परसवर्णत्वेन नकारे कृते 'शान्तः' इति सिद्धम्।

विशेषः अनुस्वारस्य नासिका स्थानम् अस्ति, अतः तस्य स्थाने वर्गस्य पञ्चमः वर्णः करणीयः। कवर्गे परे ङकारः, चवर्गे ञकारः, टवर्गे णकारः, तवर्गे नकार, पवर्गे तु मकारः इति।

अन्यानि उदाहरणानि -

अं + कितः = अङ्कितः। अं + चितः = अञ्चितः। गुं + जनम् = गुञ्जनम्। कुं + ठितः = कुण्ठितः। गुं + फितः = गुम्फितः इत्यादीनि।

८०. पदान्तस्य अनुस्वारस्य विकल्पेन परसवर्णः भवति। अपदान्तस्य तु नित्यम् इति ज्ञेयम्।

उदाहरणस्य विश्लेषणम् -

त्वं + करोषि इत्यत्र 'त्वं' पदम् अस्ति, तस्य अन्ते अनुस्वारः पदान्तः। तस्य अनुस्वारस्य परसवर्णे ङकारे विकल्पेन कृते 'त्वङ्करोषि' इति रूपम्। परसवर्णाभावे तु 'त्वं करोषि' इति।

रूपलेखनप्रकारः -

त्वम् + करोषि इत्यत्र ''मोऽनुस्वार'' इति सूत्रेण मकारस्य अनुस्वारे कृते 'त्वं करोषि' इति स्थिते ''अनुस्वारस्य ययि परसवर्णः'' इति सूत्रेण अनुस्वारस्य नित्यं परसवर्णे प्राप्ते तं प्रबाध्य ''वा पदान्तस्य'' इति

८१. **मो राजि समः क्वौ ८/३/२५**
क्विबन्ते राजतौ परे समो मस्य म एव स्यात्। सम्राट्।

८२. **हे मपरे वा ८/३/२६**
मपरे हकारे परे मस्य मो वा। किम् ह्मलयति, किं ह्मलयति। (यवलपरे यवला वा) किँय् ह्यः, किं ह्यः। किँव् ह्वलयति, किं ह्वलयति। किँल् ह्लादयति, किं ह्लादयति।

सूत्रेण विकल्पेन परसवर्णे ङकारे कृते 'त्वङ्करोषि' इति रूपं सिद्धम्। परसवर्णाभावपक्षे तु 'त्वं' करोषि' इति रूपमपि सिद्धम्।

अन्यानि उदाहरणानि –

त्वं + चलसि = त्वञ्चलसि, त्वं चलसि। शत्रुं + जयति = शत्रुञ्जयति, शत्रुं जयति। अहं + यामि = अहँय्यामि, अहं यामि इत्यादीनि।

८१. **मः राजि समः क्वौ** इतिच्छेदः। क्वौ इति क्वि (क्विप्) इत्यस्य सप्तम्येकवचने रूपम्। प्रत्ययेन तदन्तग्रहणम्, अतः क्वौ परे इत्यस्य क्विबन्ते परे इत्यर्थः। इत्थम् – क्विप्प्रत्ययान्ते राज्शब्दे परे 'सम्' इत्युपसर्गस्य मस्य म एव भवति, न पुनः ''मोऽनुस्वारः'' इति अनुस्वारः इत्याशयः।

उदाहरणस्य विश्लेषणम् –

'सम्राट्' इत्यत्र सम् + राट् इत्यवस्थायां ''मोऽनुस्वारः'' इति प्राप्तम्। अनेन सूत्रेण अवस्थाविशेषे समः मस्य मकार एव विधीयते, अतः 'सम्राट' इति रूपम्। यत्र राज्धातुः परः न भवति, तत्र तु अनुस्वारः भवति। यथा – संरावः इत्यादौ।

रूपलेखनप्रकारः –

सम् + राट् इत्यत्र ''मोऽनुस्वारः'' इति सूत्रेण पदान्तस्य मकारस्य अनुस्वारे प्राप्ते तं प्रबाध्य ''मो राजि समः क्वौ'' इति सूत्रेण मकारस्य मकारे एव कृते वर्णसम्मेलने 'सम्राट्' इति रूपं निष्पन्नम्।

विशेषः उपसर्गः अपि पदं भवति, अतः 'सम्' इत्यत्र मस्य पदान्तत्वम् अस्तीति ज्ञेयम्।

८२. मः परः यस्मात् सः मपरः। तादृशे हकारे परे मस्य विकल्पेन म एव भवति। अर्थात् मपरहकारे परे मस्य मः, पक्षे अनुस्वारः।

उदाहरणस्य विश्लेषणम् –

किम् + ह्मलयति इत्यत्र 'किम्' इत्यत्र पदान्तः मकारः, तस्माच्च मकारात्परः मपरहकारः 'ह्म' इति विद्यते। अतः अत्र ''मोऽनुस्वारः'' इति प्राप्तम् अनुस्वारं प्रबाध्य अनेन सूत्रेण मस्य विकल्पेन मकार एव विधीयते। पक्षे तु अनुस्वारः भवति, तत्र किं ह्मलयति इति रूपम्।

रूपलेखनप्रकारः –

किम् + ह्मलयति इत्यत्र ''हे मपरे वा'' इति सूत्रेण विकल्पेन मस्य मकारे कृते किम् ह्मलयति इतिरूपम्। पक्षे तु अनुस्वारे सति किं ह्मलयति इति रूपमपि सिद्धम्।

वार्तिकम् –

यपरहकारे, वपरहकारे, लपरहकारे च परे मस्य विकल्पेन क्रमशः अनुनासिकाः यवलाः विधीयन्ते इति तात्पर्यम्।

उदाहरणविश्लेषणम् –

किम् + ह्यः इत्यत्र यपरहकारः विद्यते। अतः तस्मिन् परे मस्य विकल्पेन अनुनासिकः यकारः। किम् ह्वलयति इत्यत्र मस्य अनुनासिकः वकारः, वपरहकारपरत्वात्। किम् + ह्लादयति, इत्यत्र लपरहकारपरत्वात्

८३. **नपरे नः ८/३/२७**
नपरे हकारे मस्य नो वा। किन् ह्नुते, किं ह्नुते।

८४. **आद्यन्तौ टकितौ १/१/४६**
टित्‌कितौ यस्योक्तौ तस्य क्रमादाद्यन्तावयवौ स्तः।

८५. **ङ्णोः कुक्टुक् शरि ८/३/२८**
वा स्तः। (चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्) प्राङ्ख् षष्ठः,

---

मस्य अनुनासिकः लकारः। पक्षे तु सर्वत्र अनुस्वारः।

रूपलेखनप्रकारः –

किम् + ह्यः इत्यत्र ''मोऽनुस्वारः'' इति सूत्रेण मस्य अनुस्वारे प्राप्ते तं प्रबाध्य ''यवलपरे यवला वा'' इति वार्तिकेन मस्य विकल्पेन अनुनासिके यकारे (मस्यापि अनुनासिकत्वात्) कृते किँय् ह्यः इति रूपं सिद्धम्। पक्षे किं ह्यः इति अनुस्वारः। एवमेव अन्यत्रापि ज्ञेयम्।

८३. नपरहकारे परे मस्य विकल्पेन नकारः भवति। नः परः यस्मात् इति नपरः। नपरश्चासौ हकारः नपरहकारः, तस्मिन्।

उदाहरणस्य विश्लेषणम् –

किम् + ह्नुते इत्यत्र नपरहकारपरत्वात् मस्य अनुस्वारं प्रबाध्य अनेन नकारः विधीयते। नकाराभावे तु अनुस्वारः कार्यः।

रूपलेखनप्रकारः –

किम् + ह्नुते इत्यत्र 'मोऽनुस्वारः' इति सूत्रेण मस्य अनुस्वारे प्राप्ते तं प्रबाध्य ''नपरे नः'' इति सूत्रेण मस्य विकल्पेन नकारे कृते 'किन् ह्नुते' इति रूपम्। पक्षे तु अनुस्वारे कृते 'किं ह्नुते' इति रूपं सिद्धम्।

८४. अग्रे आगमाः वक्ष्यन्ते। कस्यापि विशिष्टवर्णस्य पुरः पश्चाद् वा कश्चन वर्णः वर्णसमुदायः वा मित्रवत् आगच्छति स आगमः उच्यते। स च यस्य उक्तः, तस्य कुत्र तिष्ठेत् इति व्यवस्थां सम्पादयन् आह – 'आद्यन्तौ' इति। आदिश्च अन्तश्च आद्यन्तौ। टश्च कश्च इति टकौ। टकौ इतौ = इत्संज्ञकौ ययोः तौ टकितौ, टित् कित् च इत्यर्थः। अर्थात् यस्य आगमस्य टकारः इत्, यस्य च ककारः इत् तौ टकितौ आगमौ यस्य उक्तौ, तस्य (आगमिनः) क्रमशः आद्यवयवः भवति, अन्तावयवश्च भवति। आगमः यस्य भवति स आगमी उच्यते। अर्थात् टिदागमः आगमिनः आदौ अवयवत्वेन तिष्ठति, किदागमश्च अन्तावयवत्वेन इति विवेकः।

८५. ङ्णोः कुक्‌टुक् शरि। शर् इति शषसवर्णानां बोधकः प्रत्याहारः। ङ् च ण् च ङ्णौ, तयोः ङ्णोः। अर्थात् शरि परे सति विकल्पेन ङकारस्य कुगागमः, णकारस्य च टुगागमः भवति। कुक् टुक् इत्यत्र क्रमशः क् इति ट् इति अवशिष्यते। एतौ कितौ स्तः।

उदाहरणस्य विश्लेषणम् –

प्राङ् + षष्ठः, सुगण् + षष्ठः इत्यत्र ङकारात् णकारात् च परः षकारः (शर्) अस्ति, अतः ''आद्यन्तौ टकितौ'' इति सूत्रानुसारं ङ्णोः क्रमशः कित्त्वात् अन्ते कुगागमः टुगागमश्च जातः अतः प्राङ् क् + षष्ठः, सुगण्ट्षष्ठः इति स्थितिः जाता। प्राङ्क्षष्ठः, प्राङ्षष्ठः। सुगण्ठ् षष्ठः, सुगण्ट् षष्ठः, सुगण् षष्ठः।

८६. **डः सि धुट् ८/३/२९**
डात् परस्य सस्य धुड् वा। षट्त्सन्तः, षट्सन्तः।

८७. **नश्च ८/३/३०**
नान्तात् परस्य सस्य धुड् वा। सन्त्सः, सन्सः।

वार्तिकम् –

शरि परे चयः (वर्गप्रथमवर्णाः) द्वितीयवर्णत्वेन विकल्पेन प्रयुज्यन्ते पौष्करसादेः मतानुसारम्। पौष्करसादिः कश्चन वैयाकरणः प्राचीनः।

उदाहरणस्य विश्लेषणम् –

प्राङ्क् षष्ठः, सुगण् ट् षष्ठः इत्यत्र शर्परत्वात् अनेन वार्तिकेन ककारटकारयोः खकारठकारौ विधीयेते। अतः प्राङ्ख् षष्ठः, सुगण्ठ्षष्ठः इति रूपम्। पक्षे प्रथमवर्णः अपि तिष्ठति प्राङ्क्षष्ठः, सुगण्ट्षष्ठः इत्यपि। यत्र च आगम एव न भवति तस्मिन् पक्षे प्राङ्षष्ठः, सुगण् षष्ठः इति रूपम्।

रूपलेखनप्रकारः –

प्राङ् + षष्ठः इत्यत्र ''ङणोः कुक्टुक् शरि'' इति सूत्रेण ''आद्यन्तौ टकितौ'' इति सूत्रसहकारेण विकल्पेन ङकारस्य अन्तावयवे कुगागमेऽनुबन्धलोपे प्राङ्क्षष्ठः इति जाते, ''चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्'' इति वार्तिकेन ककारस्य विकल्पेन खकारे कृते प्राङ्ख् षष्ठः इति रूपम्। खकाराभावपक्षे प्राङ्क्षष्ठः = प्राङ्क्षष्ठः इति द्वितीयं रूपम्। आगमाभावे तु प्राङ् षष्ठः इति तृतीयं रूपं सिद्धम्।

८६. डकारात् अव्यवहितपरस्य = व्यवधानशून्यस्य परस्य सकारस्य विकल्पेन धुडागमः भवति। धुडागमस्य 'ध्' अवशिष्यते। अयञ्चः टित् अस्ति। टित्त्वात् सस्य आदौ भवति ''आद्यन्तौ०'' इति व्यवस्थया।

उदाहरणस्य विश्लेषणम् –

षड् + सन्तः इत्यत्र डकारात् साक्षात् परः सकारः अस्ति। अस्य सस्य आदौ धुडागमः अनेन विधीयते। अतः षड् + ध् + सन्तः इत्यवस्था जाता, अत्र चर्त्वेन धस्य तकारे, डस्य च टकारे षट्त्सन्तः। धुडभावे षट्सन्तः इति रूपम्।

रूपलेखनप्रकारः –

षड् + सन्तः इत्यत्र ''डः सि धुट्'' इति सूत्रेण सस्य आदौ विकल्पेन धुडागमे अनुबन्धलोपे च कृते षड् + ध् + सन्तः इति जाते ''खरि च'' इति सूत्रेण धस्य चर्त्वेन तकारे कृते 'षड्त् सन्तः' इति स्थिते पुनः 'खरि च' इति सूत्रेण डकारस्य चर्त्वेन टकारे कृते 'षट्त्सन्तः' इति प्रथमं रूपम्। यत्र धुट् न कृतः तत्र डकारस्य चर्त्वेन टकारे कृते षट्सन्तः इति रूपं सिद्धम्।

अन्यानि उदाहरणानि –

सम्राड् + सत्यः = सम्राट्त्सत्यः, सम्राट्सत्यः। लिड् + सु = लिट्त्सु, लिट्सु इत्यादीनि।

८७. नान्तात् = नकारान्तात् परस्य सस्य अपि आदौ विकल्पेन धुडागमः भवति।

उदाहरणस्य विश्लेषणम् –

सन् + सः इत्यत्र सन् इति नकारान्तं पदम् अस्ति। ततः परश्च 'सः' इति सकारः वर्तते। अस्य सकारस्य अनेन सूत्रेण विकल्पेन आदौ धुडागमः क्रियते, तस्य च चर्त्वे सन्त्सः इति रूपम्। धुडभावे तु सन्सः इति।

रूपलेखनप्रकारः –

सन् + सः इत्यत्र ''नश्च'' इति सूत्रेण नकारात् परस्य सस्य आदौ विकल्पेन धुडागमेऽनुबन्धलोपे च कृते सन् + ध् + सः इति जाते ''खरि च'' इति सूत्रेण धस्य चर्त्वेन तकारे कृते सन्त्सः इति रूपम्। धुडभावे तु सन्सः इति रूपमपि सिद्धम्।

८८. शि तुक् ८/३/३१

पदान्तस्य नस्य शे परे तुग्वा। सञ्छम्भुः, सञ्च्छम्भुः, सञ्च्शम्भुः, सञ्शम्भुः।

८९. ङमो ह्रस्वादचि ङमुण् नित्यम् ८/३/३२

ह्रस्वात् परो यो ङम् तदन्तं यत्पदं, तस्मात्परस्याचो ङमुट् स्यात्। प्रत्यङ्ङात्मा, सुगण्णीशः, सन्नच्युतः।

अन्यानि उदाहरणानि –

त्रीन् + समुद्रान् = त्रीन्त्समुद्रान्, त्रीन्समुद्रान्। भगवान् + साधुं रक्षति = भगवान्त्साधुं, भगवान्साधुं रक्षति। विद्वान् + सहते = विद्वान्त्सहते, विद्वान्सहते इत्यादीनि।

८८. पदान्तः यः नकारः, तस्मात् शकारे परे, तस्य नकारस्य (तुक्) तुगागमः विकल्पेन भवति। तुक् इत्यत्र त् अवशिष्यते। अत्र ककारस्य इत्संज्ञात्वात् अयमागमः कित् अस्ति। अतः अयम् अन्तावयवत्वेन तिष्ठति।

रूपलेखनप्रकारः –

सन् + शम्भुः इत्यत्र ''शि तुक्'' इति सूत्रेण नस्य विकल्पेन तुगागमेऽनुबन्ध लोपे सन् + त् + शम्भुः इति स्थिते ''स्तोः श्चुना श्चुः'' इति सूत्रेण शकारयोगे तकारस्य चुत्वेन चकारे पुनश्च चकारयोगे नस्य ञकारे सञ्च्शम्भुः इत्यवस्थायां ''शश्छोऽटि'' इति सूत्रेण शस्य विकल्पेन छकारे सञ्च्छम्भुः इति स्थिते ''झरो झरि सवर्णे'' इति सूत्रेण विकल्पेन चकारस्य लोपे सञ्छम्भुः इति रूपम्। चलोपाभावे सञ्च्छम्भुः इति द्वितीयं रूपम्। छत्वाभावे चलोपाभावे च सञ्च्शम्भुः इति तृतीयं तथा तुगभावे सञ्शम्भुः इति चतुर्थं रूपं सिद्धम्।

८९. ङमः ह्रस्वाद् अचि ङमुट् नित्यम् इतिच्छेदः। ङम् इति प्रत्याहारः 'ङ् ण् न्' इति वर्णानां बोधकः। ङमुट् इति (ङम्+उट्) प्रत्येकं वर्णस्य उट्संयोगः अर्थात् ङुट्, णुट्, नुट् इति तात्पर्यम्। अतः सूत्रार्थः इत्थं करणीयः– ह्रस्वात् परः यः ङम् (ङ् ण् न्) तदन्तात् अचि परे सति, तस्य अचः आदौ ङमुडागमः भवति। अर्थात् ङकारात् परस्य अचः ङुट्, णकारत्परस्य णुट्, नकारात्परस्य च नुट् भवति इत्याशयः।

उदाहरणस्य विश्लेषणम् –

प्रत्यङ् + आत्मा इत्यत्र ह्रस्वात्परः ङम् ङकारः, तस्मात् परः 'आत्मा' इत्याकारः अच्, अस्य अचः आद्यवयवत्वेन ङुडागमः अनुबन्धलोपश्च भवति, अतः प्रत्यङ् + ङ् + आत्मा = प्रत्यङ्ङात्मा इति रूपम्। सुगण् + ईशः = सुगण् ण् ईशः = सुगण्णीशः। सन् + अच्युतः सन् + न् + अच्युतः = सन्नच्युतः इत्येवम्।

रूपलेखनप्रकारः –

प्रत्यङ् + आत्मा इत्यत्र ''ङमो ह्रस्वादचि ङमुण् नित्यम्'' इति सूत्रेण ङमः (ङकारात्) परस्य ''आत्मा'' इत्याकाररूपस्य अचः आदौ ङुडागमेऽनुबन्धलोपे प्रत्यङ् + ङ् + आत्मा इति दशायां वर्णसम्मेलने 'प्रत्यङ्ङात्मा' इति रूपं सिद्धम्। सुगण् + ईशः इत्यत्र णुट्, सन् + अच्युतः इत्यत्र नुट् भवति इति ध्येयम्।

अन्यानि उदाहणानि –

अस्मिन् + अपि = अस्मिन्नपि, हसन् + अश्नाति = हसन्नश्नाति इत्यादीनि।

९०.	**समः सुटि ८/३/५**
समो रुः सुटि।

९१.	**अत्रानुनासिकः पूर्वस्य तु वा ८/३/२**
अत्र रुप्रकरणे रोः पूर्वस्य अनुनासिको वा।

९२.	**अनुनासिकात्परोऽनुस्वारः ८/३/२**
अनुनासिकं विहाय रोः पूर्वस्मात्परोऽनुस्वारागमः।

९३.	**खरवसानयोर्विसर्जनीयः ८/३/१५**
खरि अवसाने च पदान्तस्य रेफस्य विसर्गः स्यात्। (सम्पुङ्कानां सो वक्तव्यः) सँस्स्कर्ता।, संस्स्कर्ता।

९०.	सम् इति उपसर्गस्य सुडागमे परे रुः भवति। स च तस्य अन्त्यस्य मकारस्य विधेयः 'अलोन्त्यस्य' इति न्यायात्। यथा सम् + स्कर्ता इत्यत्र मकारात् सुट् परः अस्ति, अतः मस्य रुत्वे सरु + स्कर्ता इति स्थिते -

९१.	अत्र = रुप्रकरणे अर्थात् यत्र रुः भवति, तस्मिन् प्रकरणे रोः पूर्वस्य विकल्पेन अनुनासिकः भवति। तद्यथा - सँ रु + स्कर्ता इति जाते - -

९२.	रुप्रकरणे यत्र अनुनासिकः न भवति, तस्मिन् पक्षे रोः पूर्वस्मात् अचः परः अनुस्वारागमः भवति। इत्थं रुप्रकरणे एकपक्षे अनुनासिकः, अपरत्र अनुस्वारश्च रोः पूर्वस्मात् परः भवति। तद्यथा - सँरु + स्कर्ता, संरु + स्कर्ता इत्येवं पक्षद्वयम्।

९३.	खर् + अवसानयोः विसर्जनीयः। अर्थात् खरि परे अवसाने च पदान्तस्य रेफस्य विसर्गः भवति। विसर्जनीयः = विसर्गः। सँरु + स्कर्ता, संरु +स्कर्ता इत्यत्र 'रु' इत्यस्य उकारस्य अनुनासिकत्वप्रतिज्ञया ''उपदेशेऽजनुनासिक इत्'' इति सूत्रेण इत्संज्ञायां 'तस्य लोपः'' इत्यनेन लोपे कृते सँर् + स्कर्ता, संर् + स्कर्ता इति स्थितौ ''खरवसानयोर्विसर्जनीयः'' इति सूत्रेण खरि परे रोः रेफस्य विसर्गे प्राप्ते ....

वार्तिकम् -

''संम्पुङ्कानां सो वक्तव्यः''। 'सम् पुम् कान्' इत्येषां यः रुः, तस्य रेफस्य सकारः भवति, न तु विसर्जनीयः। अत्र सँर् + स्कर्ता, संर् + स्कर्ता इत्यत्र समः रेफस्य सत्त्वात्, तत्स्थाने सत्वम् अनेन वार्तिकेन भवति, अतः संस्स्कर्ता, संस्स्कर्ता इति रुपद्वयं सिद्धं भवति।

रूपलेखनप्रकारः -

सम् + स्कर्ता इत्यत्र मस्य 'मोऽनुस्वारः' इत्यनुस्वारे प्राप्ते तत्प्रबाध्य ''समः सुटि'' इति सूत्रेण समः मस्य रुत्वे 'अनुबन्धलोपे च कृते सर् + स्कर्ता इति स्थिते ''अत्रानुनासिकः पूर्वस्य तु वा'' इति सूत्रेण रोः पूर्वस्य विकल्पेन अनुनासिके कृते पक्षे ''अनुनासिकात्परोऽनुस्वारः'' इत्यनेन अनुस्वारागमे च कृते सँर् + स्कर्ता, संर् + स्कर्ता इति स्थितौ ''खरवसानयोर्विसर्जनीयः'' इति सूत्रेण रेफस्य स्थाने विसर्गे प्राप्ते, तत्प्रबाध्य ''सम्पुङ्कानां सो वक्तव्यः ''इति वार्तिकेन रेफस्य सकारे कृते सँस्स्कर्ता, संस्स्कर्ता इति रूपद्वयं सिद्धम्।

अन्यानि उदाहरणानि -

सँस्स्कारः, संस्स्कारः। सँस्स्कृतिः, संस्स्कृतिः। (अलङ्करणम् इत्यर्थः)

९४. **पुमः खय्यम्परे ८/३/६**
अम्परे खयि पुमो रुः। पुँस्कोकिलः, पुंस्कोकिलः।

९५. **नश्छव्यप्रशान् ८/३/७**
अम्परे छवि नान्तस्य पदस्य रुः स्यात्।

९६. **विसर्जनीयस्य सः ८/३/३४**
खरि। चक्रिँस्त्रायस्व, चक्रिंस्त्रायस्व। अप्रशान् किम?
प्रशान्तनोति। पदान्तस्येति किम् ? हन्ति।

---

९४. **पुमः खयि अम्परे** इतिच्छेदः। खय् इति प्रत्याहारः, तत्र वर्गाणां प्रथमद्वितीयाः वर्णाः भवन्ति। अम्प्रत्याहारान्तर्गताः वर्णाः यदि खयः परतः विद्यमानाः स्युः, तादृशः खय् अम्परः इत्युच्यते। अम्परे खयि परे पुम् शब्दस्य मकारस्य रुत्वं भवति इति सूत्राशयः।

उदाहरणस्य विश्लेषणम् -

पुम् + कोकिलः इत्यत्र पुमः परतः कोकिलशब्दस्य ककारः खय् विद्यते, तस्माच्च परः ओकारः अम्। अतः पुम् शब्दात् परतः अम्परकस्य खयः विद्यमानत्वात् अनेन सूत्रेण मस्य रुत्वं विधीयते, अन्यत्सर्वं सँस्स्कर्ता इतिवत्कार्यम्।

रूपलेखनप्रकारः -

पुम् + कोकिलः इत्यत्र ''पुमः खय्यम्परे'' इति सूत्रेण मस्य रुत्वे अनुबन्धलोपे पुर् + कोकिलः इति स्थिते ''अत्रानुनासिकः पूर्वस्य तु वा'' इति अनुनासिके वैकल्पिके कृते, पक्षे ''अनुनासिकात्परोऽनुस्वारः'' इत्यनुस्वारागमे पुँर् + कोकिलः पुंर् + कोकिलः इति जाते, रेफस्य ''खरवसानयो॰'' इति विसर्गे प्राप्ते तम्प्रबाध्य ''सम्पुङ्कानां सो वक्तव्यः'' इति वार्तिकेन रेफस्य सकारे कृते पुँस्कोकिलः, पुंस्कोकिलः इति रुपद्वयं सिद्धम्।

अन्यानि उदाहरणानि -

पुम् + चरित्रम् = पुँश्चरित्रम्, पुंश्चरित्रम्।
पुम् + खनित्रम् = पुँस्खनित्रम्, पुंस्खनित्रम् इत्यादीनि।

९५. **नः छवि अप्रशान्** इतिच्छेदः। अम्परके छवि परे सति नान्तस्य पदस्य रुः भवति, प्रशान् इति प्रदस्य तु न। 'अलोऽन्त्यस्य' इत्यनुसारं नान्तस्य पदस्य अन्त्यनकारस्य इति फलितम्।

उदाहरणस्य विश्लेषणम् -

चक्रिन् + त्रायस्व इत्यत्र 'चक्रिन्' इति नान्तं पदम्, ततश्च परः अम्परकः छव् 'त्र' इति विद्यते। तादृशे छवि परे चक्रिन् इति नान्तस्य पदस्य ''अलोऽन्त्यस्य'' इत्यनुसारम् अन्त्यस्य नकाररूपस्य अलः स्थाने अनेन रुत्वं विधीयते। ततश्च रुत्वप्रकरणे अनुनासिकत्वे अनुस्वारागमे रेफस्य विसर्गे च कृते चक्रिँः+त्रायस्व, चक्रिंः+त्रायस्व इति स्थिते विर्गस्य सत्वविधायकं सूत्रम् आह - ''विसर्जनीयस्य सः'' इति।

९६. खरि परे विसर्गस्य स्थाने सकारः भवति।

उदाहरणस्य विश्लेषणम् -

'त्रायस्व' इत्यत्र तकारः खरन्तर्गतः। तस्मिन् परे विसर्गस्य अनेन सकारः विधीयते चक्रिँस्त्रायस्व, चक्रिंस्त्रायस्व इति।

रुपलेखनप्रकारः -

चक्रिन् + त्रायस्व इत्यत्र ''नश्छव्यप्रशान्'' इति नस्य रुत्वेऽनुबन्धलोपे पूर्वस्य अनुनासिके, पक्षे

९७. **नॄन्पे ८/३/१०**

नॄनित्यस्य रुर्वा पे।

९८. **कुप्वोः ⨯ क ⨯ पौ च ८/३/३७**

कवर्गे पवर्गे च विसर्गस्य ⨯ क ⨯ पौ स्तः, चाद्विसर्गः।

नॄँ⨯पाहि, नॄं⨯पाहि, नॄँः पाहि, नॄंः पाहि, नॄन् पाहि।

अनुस्वारागमे ''खरवसानयोर्विसर्जनीयः'' रेफस्य च विसर्गे कृते ''विसर्जनीयस्य सः'' इति सूत्रेण विसर्गस्य स्थाने सकारे कृते चक्रिँस्त्रायस्व, चक्रिंस्त्रायस्व इति रूपद्वयं सिद्धम्।

विशेषः -

''नश्छव्यप्रशान्'' इति सूत्रेण प्रशान् शब्दस्य नस्य रुत्वं न भवति, अतः 'अप्रशान्' इत्युक्तं सूत्रे। यदि सूत्रे अप्रशान् इति निषेधः नाभविष्यत् तदा तु प्रशान्तनोति इत्यत्रापि नस्य रुत्वापत्तिः आपतिष्यत्। यदि'पदान्तस्य' इति न उच्येत तर्हि अपदान्तस्य अपि 'हन्ति' इति नस्य रुत्वापत्तिः भवेत्।

अन्यानि उदाहरणानि

विद्वान् + चरति = विद्वाँश्चरति, विद्वांश्चरति।
कस्मिन् + तगाडे = कस्मिँस्तडागे, कस्मिंस्तडागे।
भवान् + छद्मी = भवाँश्छद्मी, भवांश्छद्मी।
पटीयान् + छात्रः = पटीयाँश्छात्रः, पटीयांश्छात्रः।
चञ्चुमान् + टिट्टिभः = चञ्चुमाँष्टिट्टिभः, चञ्चुमांष्टिट्टिभः इत्यादीनि।

९७. **नॄन् पे** इतिच्छेदः। पे = पकारे। पकारे परे '**नॄन्**' इति पदस्य ''अलोऽन्त्यस्य'' इति परिभाषया अन्त्यस्य नस्य विकल्पेन रुः भवति इति सूत्राशयः।

उदाहरणस्य विश्लेषणम् -

नॄन् + पाहि इत्यत्र नॄन् इति नकारात्परः 'पाहि' इत्यस्य पकारः विद्यमानः। अतः अस्य नस्य अनेन रुत्वं भवति, जाते च रुत्वे अनुनासिके, अनुस्वारागमे च नॄँर् + पाहि, नॄंर् + पाहि इत्यवस्थायां रेफस्य विसर्गे सति नॄँः पाहि, नॄंः पाहि इति स्थितौ -

९८. कुश्च पुश्च कुपू तयोः कुप्वोः। अर्थात् कवर्गे पवर्गे च परे विसर्गस्य क्रमशः जिह्वामूलीयः उपध्मानीयश्च भवति। विसर्गस्य विसर्गः अपि भवति इति सूत्रस्य तात्पर्यम्।

उदाहरणस्य विश्लेषणम् -

नॄँः पाहि, नॄंः पाहि इत्यवस्थायां पवर्गपरत्वात् विसर्गस्य उपध्मानीयः अनेन विधीयते, विसर्गस्य विसर्गः अपि पक्षे भवति। अतः नॄँ⨯पाहि, नॄं⨯पाहि, नॄँःपाहि, नॄंःपाहि इति रूपचतुष्कम्। रुत्वाभावे तु नॄन् पाहि इत्यपि रूपम्।

रूपलेखनप्रकारः -

नॄन् + पाहि इत्यत्र 'नॄन्पे' इति सूत्रेण ''अलोऽन्त्यस्य'' इति परिभाषासहकारेण विकल्पेन नस्य रुत्वेऽनुबन्धलोपे च कृते नॄर्+पाहि इति स्थितौ, रोः पूर्वस्य अनुनासिके, पक्षे अनुस्वारागमे च कृते ''खरवसानयोर्विसर्जनीयः'' इति सूत्रेण रेफस्य विसर्गे नॄँः पाहि, नॄंः पाहि इत्यवस्थायां ''कुप्वोः ⨯क⨯पौ च'' इति सूत्रेण विसर्गस्य उपध्मानीये, पक्षे विसर्गस्य विसर्गे च कृते नॄँ⨯पाहि, नॄं⨯पाहि, नॄँः पाहि, नॄंः पाहि इति रूपाणि सिध्यन्ति। रुत्वाभावे तु नॄन् पाहि इत्यपि साधुः प्रयोगः।

९९. तस्य परमाम्रेडितम् ८/१/२

द्विरुक्तस्य परमाम्रेडितं स्यात्।

१००. कानाम्रेडिते ८/३/१२

कान्नकारस्य रुः स्यादाम्रेडिते परे। काँस्कान्, कांस्कान्।

१०१. छे च ६/१/७२

ह्रस्वस्य छे तुग्वा। शिवच्छाया।

अन्यानि उदाहणानि -

नॄन् + प्रति = नॄँ × प्रति, नॄं × प्रति, नॄँः प्रति, नॄंः प्रति, नॄन्प्रति।

नॄन्+पालयति, नॄन्प्रतिषेधति इत्यादीनि।

९९. वीप्सार्थे शब्दस्य द्वित्वं भवति। तत्र द्विवारम् उक्तस्य यत् परम् = उत्तरं द्वितीयं वा पदं भवति, तस्य आम्रेडितसंज्ञा भवति। सूत्रमिदम् आम्रेडितसंज्ञाविधायकम्। यथा वीप्सायां कान् इत्यस्य द्वित्वे कृते 'कान् कान्' इति प्रयोगे परस्य 'कान्' इत्यस्य अनेन आम्रेडितसंज्ञा क्रियते। तस्याः संज्ञायाः अत्र किं प्रयोजनम् इति जिज्ञासायाम् वक्ष्यते 'कानाम्रेडिते' इति।

१००. कान् + आम्रेडिते इतिच्छेदः। आम्रेडिते = आम्रेडितसंज्ञके परे पूर्वस्य कान् शब्दस्य रुत्वं भवति। तच्च 'अलोऽन्त्यस्य' परिभाषया नकारस्य भवति इति व्यवस्था। अतः वृत्तौ लिखितम् - कान्नकारस्य इति। कानः नकारस्य इति भावः।

उदाहरणस्य विश्लेषणम् -

कान् कान् इति वीप्सायां द्वित्वे परस्य आम्रेडितसंज्ञायाम्, आम्रेडिते परे पूर्वस्य कानः नस्य रुत्वे अनुनासिके, अनुस्वारागमे, कृते रेफस्य विसर्गे प्राप्ते ''सम्पुङ्कानां.'' इति वार्तिकेन सकारे काँस्कान्, कांस्कान् इति।

रूपलेखनप्रकारः -

कान् + कान् इत्यत्र ''तस्य परमाम्रेडितम्'' इति सूत्रेण परस्य कान् शब्दस्य आम्रेडितसंज्ञायां कृतायां ''कानाम्रेडिते'' इति सूत्रेण 'अलोऽन्त्यस्य' इति परिभाषासहकारेण पूर्वस्य कान्शब्दस्य नकारस्य रुत्वे अनुबन्धलोपे रोः पूर्वस्य ''अत्रानुनासिकः पूर्वस्य तु वा'' इति सूत्रेण अनुनासिके, पक्षे च 'अनुनासिकात्परोऽनुस्वारः'' इति सूत्रेण अनुस्वारागमे काँर् + कान्, कांर् + कान् इति जाते ''खरवसानयोर्विसर्जनीयः'' इति सूत्रेण रेफस्य विसर्गे प्राप्ते तं प्रबाध्य ''सम्पुङ्कानां सो वक्तव्यः'' इति वार्तिकेन रेफस्य सकारे कृते काँस्कान्, कांस्कान् इति द्वे रूपे सिद्ध्यतः।

१०१. छकारे परे ह्रस्वस्य अचः 'तुक्' भवति। अयञ्च कित्। कित्त्वात् अचः अन्तावयवत्वेन प्रयुज्यते।

९०२. ‘पदान्ताद् वा ६/१/७३
दीर्घात् पदान्ताच्छे तुग्वा। लक्ष्मीच्छाया, लक्ष्मीछाया।
“इति हल्सन्धिः”

उदाहरणस्य विश्लेषणम् –

शिव+छाया इत्यत्र ह्रस्वात् अकारात् परः छकारः विद्यते, तस्मिन् छकारे परे ह्रस्वस्य अकारस्य अन्तावयवः तुगागमः विधीयते, तस्य च छकारयोगे श्चुत्वे कृते शिवच्छाया इति।

रूपलेखनप्रकारः –

शिव+छाया इत्यत्र “छे च” इति सूत्रेण “आद्यन्तौ टकितौ” इति सहकारेण ह्रस्वस्य अकारस्य अन्तावयवे तुगागमेऽनुबन्धलोपे च कृते शिव त् छाया इति स्थितौ “स्तोःश्चुना श्चुः” इत्यनेन श्चुत्वे प्राप्ते, तस्य असिद्धत्वात् पूर्वं “झलां जशोऽन्ते” इति सूत्रेण जश्त्वेन तकारस्य दकारे शिव द् छाया इति जाते ‘खरि च’ इति चर्त्वे प्राप्ते, तस्यापि असिद्धत्वात् पूर्वं “स्तोः श्चुना श्चुः” इत्यनेन चुत्वेन दस्य जकारे कृते शिवज् छाया इति स्थिते “खरि च” इत्यनेन चर्त्वेन जस्य चकारे कृते ‘शिवच्छाया’ इति रूपं सिद्धम्।

अन्यानि उदाहरणानि –

पदच्छेदः, वृक्षच्छाया, एकच्छत्रम्, गृहच्छादनम्, तृणच्छेद्यम् इत्यादीनि।

१०२. पदान्तात् दीर्घात् छे परे वैकल्पिकः तुक् भवति। अर्थात् पदान्ते यः दीर्घः स्वरः, तस्य अन्तावयवः तुक् भवति छकारे परे सति इति सूत्राशयः।

उदाहरणस्य विश्लेषणम् –

लक्ष्मीच्छाया, लक्ष्मीछाया इति। लक्ष्मी इति पदम्, तत्र पदान्ते दीर्घः ईकारः, तस्माच्च परः छाया इति छकारः। तस्मिन् छकारे परे पदान्तस्य दीर्घस्य ईकारस्य अन्तावयवः तुक् अनेन विधीयते। अयं तुगागमः विकल्पेन भवति, अतः पक्षे लक्ष्मीछाया इत्यपि रूपम्।

रूपलेखनप्रकारः –

लक्ष्मी+छाया इत्यत्र “पदान्ताद् वा” इति सूत्रेण विकल्पेन ईकारस्य अन्तावयवे तुगागमे लक्ष्मी+त्+छाया इति स्थिते तकारस्य जश्त्वेन दकारे, दस्य चुत्वेन जकारे,जस्य च चर्त्वेन चकारे कृते लक्ष्मीच्छाया इति रूपम्। तुगभावे लक्ष्मीछाया इति रूपं सिद्धम्।

इति हल्सन्धिः

अभ्यासार्थं प्रश्नाः

वस्तुनिष्ठप्रश्नाः –

१. रामस् + शेते इत्यत्र सन्धियुक्तं स्वरूपमस्ति
(क) रामो शेते (ख) राम शेते
(ग) रामश्शेते (घ) रामर् शेते ( )

२. ‘झलां जशोऽन्ते’ इत्यनेन पदान्ते स्युः –
(क) चरः (ख) हलः
(ग) जशः (घ) यरः ( )

३. अनुनासिकसन्धेरुदाहरणमस्ति

(क) रामष्टीकते (ख) एतन्मुरारिः

(ग) वागीशः (घ) उत्थानम् ( )

४. 'उत्थानम्' इत्यत्र सन्धिविच्छेदोऽस्ति –

(क) उद् + स्थानम् (ख) उद् + थानम्

(ग) उत्थ + थानम् (घ) उदः स्थानम् ( )

५. खरि झलां स्युः

(क) जशः (ख) चरः

(ग) यरः (घ) अचः ( )

६. झयः परस्य हस्य वा भवति –

(क) अनुनासिकः (ख) परस्वर्णः

(ग) पूर्वसवर्णः (घ) अनुस्वारः ( )

७. मान्तस्य पदस्यानुस्वारो भवति –

(क) खरि (ख) झरि

(ग) अटि (घ) हलि ( )

८. परसवर्णस्योदाहरणमस्ति –

(क) शान्तः (ख) वाग्घरिः

(ग) सम्राट् (घ) हरिं वन्दे ( )

९. आद्यन्तावयवौ स्तः –

(क) परसवर्ण – पूर्वसवर्णौ (ख) अज्झलौ

(ग) अनुस्वारानुनासिकौ (घ) टित्कितौ ( )

१०. कुगभावे रूपं भवति –

(क) प्राङ्ख्षष्ठः (ख) प्राङ्क्षष्ठः

(ग) प्राङ् षष्ठः (घ) प्राङ्ग्षष्ठः ( )

११. पदान्तस्य नस्य शि परे वा भवति –

(क) कुक् (ख) टुक्

(ग) तुक् (घ) धुट् ( )

१२. 'समः सुटि' इत्यनेन भवति –

(क) तुक् (ख) सुट्

(ग) रुः (घ) ङमुट् ( )

१३. द्विरुक्तस्य परं भवति –

(क) सवर्णसंज्ञम् (ख) इत्संज्ञम्

(ग) आम्रेडित-संज्ञम् (घ) वृद्धिसंज्ञम् ( )

----

१४. श्चुत्वविधायकं सूत्रं विलिख्य तदुदाहरणानि लेख्यानि।

१५. अधोऽङ्कितानां पदानां प्रयोगसिद्धिः कार्या।

प्रश्नः, वाग्घरिः, षट्सन्तः, सुगण्णीशः।

१६. धुडागमः कदा भवति ? सोदाहरणं विवेचनीयम्।